विष्णु पूजन विधि



श्रीगणेशाय नमः

विष्णुपूजनविधिः

भाषाटीकासमेतः

हिन्दीहितैषी राजमान्य चौमूँ नरेशाश्रित
हनुमान्शर्म्मसंगृहीतः

★

संस्करण : जुलाई २०१६, सवंत् २०७३

मूल्य : २० रुपये मात्र।

मुद्रक एवं प्रकाशकः
खेमराज श्रीकृष्णदास,
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग, मुंबई - ४०० ००४.

© सर्वाधिकार : प्रकाशक द्वारा सुरक्षित

Printers & Publishers :
Khemraj Shrikrishnadass Prop: Shri Venkateshwar Press, Khemraj Shrikrishnadass Marg, 7th Khetwadi, Mumbai - 400 004.

Web Site : http://www.Khe-shri com
Email : khemraj@vsnl.com

Printed by Sanjay Bajaj For M/s.Khemraj Shrikrishnadass Proprietors Shri Venkateshwar Press, Mumbai-400 004, at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate, Pune 411 013

प्रस्तावना

भारतवर्षमें देवमन्दिरोंकी न्यूनता नहीं है । किन्तु अन्तःकरणकी प्रीतिसे, शास्त्रकी विधिसे और शारीरिक श्रमसे अर्चन करनेवालोंकी 'यूनता पाई जाती है ।

समयके परिवर्तन, विधर्मियोंका संसर्ग, सद्विद्याकी न्यूनता और सुसंस्कारोंके ह्रासमे आत्माके पूजनेवाले, स्त्रियोंके पूजनेवाले, द्रव्यके पूजनेवाले, हुक्का, तमाखू एवं दुर्व्यसनोंके पूजनेवाले और अपूज्योंके पूजनेवाले प्रायः बहुत मिल सकते हैं । किन्तु भक्ति श्रद्धासे विधिपूर्वक देवपूजकोंकी अवश्य न्यूनता है । यद्यपि राजधानियोंके बडे मन्दिरोंमें तथा कई अन्य स्थानोंमें किसीतरह सांगोपांग पूजन किया जाता है तथापि ऐसे लोगोंका भी घाटा नहीं है जो शालिग्रामजीकी पच्चीस मूर्तियोंको एक कटोरेमें भरकर 'पञ्चोपचार-षोडशोपचार-राजोपचारादि' समस्त अर्चनोंका आवेश लोटाभर पानीय डालकर ही कर देते हैं । और तो क्या बडे मन्दिरोंमें भी कई जगह यथाविधि पूजन करनेवालोंकी ढोलमें पोल पाई जाती है ।

यह मान सकते हैं कि, ' सच्ची प्रीतिसे ईश्वरको धोकर पीने और दिखाकर खानेमात्रहीसे महाफल हो सकता है" किन्तु सबको ऐसे विधिशून्य पूजन करना सर्वथा अनुचित है । विधिशून्य पूजन करनेसे आत्मवैभवका नाश होता है और देवताकी प्रतिमा चली जाती है । अतएव इस दोषके दूरी करणार्थ मैंने कई एक अर्चनग्रन्थोंके आधारसे यह विष्णुपूजन विधि' नामक पुस्तक तैयार की है, जिससे विष्णुके साथ अन्यान्य देवताओंका पूजन भी हो सकता है और कर्मकांडी पण्डितोंको व्रतोद्यापनादिके प्रधानके पूजनकी भी इससे सहायता मिल सकती है ।

इस पुस्तकमें पुजारियोंके कर्तव्यकर्म, पूजनपात्रोंके शुद्ध करने और स्थापित करनेका प्रकार, कलश, घंटा, शंख आदिका पूजन, पञ्चायतन-देवताओंका अर्चन, आवश्यक मुद्राओंके लक्षण, तुलसीग्रहणार्पणादिके मन्त्र, चरणामृत, पञ्चामृतादि करनेकी रीति, शरीरका षोडशांगन्यास और पुराणोक्त एवं वेदोक्त मन्त्रोंसे विष्णुका सांगोपांग षोडशोपचार पूजन पूर्णरूपसे किया है। जिसके अवलोकनसे पुजारी अपने आप निर्भ्रम होकर अच्छीतरह पूजन कर सकते हैं।

बडे हर्षकी बात है कि, इसकी अनेकों आवृत्तियोंकी कई हजार प्रतियां स्वल्प समयमें ही लोगोंने खरीदली और प्रेसाध्यक्षोंको इसे वारंवार छापनेका अति शीघ्र अवसर दिया। इस बातसे पुस्तककी उपयोगिता और पूजकोंकी अभिरुचिका आधिक्य ये दोनों आभासित होते हैं।

आशा है कि, धार्मिक लोग इधर ध्यान देंगे और इसकी एकएक प्रति देवमन्दिरोंमें रखवाना परम आवश्यक समझेंगे। शुभम् ॥

निवेदक--हनुमान् शर्मा.

जयपुर सिटी.

श्रीहरयेनमः

विष्णुपूजनविधिः

भाषाटीकासमेतः

★

अर्चनं सम्प्रवक्ष्यामि विष्णोरमिततेजसः ।
यत्कृत्वा मुनयः सर्वे परं निर्वाणमाप्नुयुः ॥

अमित तेजस्वी विष्णुके पूजन विधानको कहते हैं, जिसको करके सब मुनि परम निर्वाणको प्राप्त हुए हैं ।

प्रातरुत्थाय शुचिर्भूत्वा सुस्नातः कृतसन्ध्यावश्यककर्मा देवमंदिरं गत्वा द्वारसन्धौ तालत्रयं दत्त्वा कपाटमुद्घाट्यान्तः प्रविश्य हस्तौ प्रक्षाल्य पूजनपात्राणि संविमृज्य जलेन प्रक्षाल्य वस्त्रेण सशोष्य च यथास्थाने संस्थापयेत् ।

प्रातःकाल उठकर शौच स्नान करके सन्ध्या आदि आवश्यक कर्म किया हुआ पुरुष देवमंदिरमें (अथवा पूजन करनेके स्थानमें) जाके द्वारसन्धिमें तीन ताली देवे और कपाट (किंवाड) खोलकर भीतर घुसके हाथ धोकर पूजनके पात्रोंको मांजे और जलसे धोकर वस्त्रसे पोंछके यथास्थानपर रख देवे ।

सुवासितजलैः पूर्णं कुम्भं दक्षिणे संस्थाप्य वामे घण्टां पुरतः गन्धपुष्पभूषणानि दक्षिणतः शंखदीपौ वामे तु धूपम् अन्यामपि पूजनोपयुक्तसामग्री च यथास्थाने संस्थाप्य

आचम्य प्राणानायम्य मङ्गलोच्चारणं कुर्यात्। सुशांतिर्भवतु। मङ्गलोच्चारणम्।

सुगंधित जलसे भरा हुआ कलश दक्षिण तर्फमें रक्खे, घण्टा बांई तर्फ रक्खे, गन्ध पुष्प भूषणादि आगे रक्खे, शंख और दीपक दाहिनी तर्फ रक्खे, धूप बायें तर्फ रक्खे और जो पूजनके वास्ते सामग्री हो सो अपने अपने स्थानमें रखकर आचमन प्राणायाम करके यथोक्त मंगल श्लोकोंका उच्चारण करे।

मङ्गलमन्त्राः-"ॐ स्वस्तिनऽइन्द्रोवृद्धश्श्रवाः स्वस्तिनःपूषाविश्ववेदाः। स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥ १ ॥ भद्रंकर्णेभिः शृणुयाम देवा भद्रंपश्येमाक्षभिर्य्यजत्राः ॥ स्थिरैरंगैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितंयदायुः ॥ २ ॥ तम्पत्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृभिरुतवा हिरण्यैः ॥ नाकंगृभ्णानाः सुकृतस्य लोके तृतीयेपृष्ठेऽअधिरोचने दिवः ॥ ३ ॥ " "संमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानिनामानि यः पठेच्छृणुयादपि ॥२॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। संग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ ४ ॥

अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥५॥ नमस्काराः-- "श्रीमहागणपतये नमः । इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः । ग्रामदेवताभ्यो नमः । स्थानदेवताभ्योनमः । श्रीलक्ष्मीनारायणाभ्यां नमः । उमामहेश्वराभ्यां नमः । शचीपुरंदराभ्यां नमः । मातापितृभ्यां नमः सर्वेभ्यो देवेभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमः । " ततः संकल्पं कुर्यात् ।

उपरोक्त मन्त्र तथा श्लोकोंका पाठ करके सबको नमस्कार करे और पीछे संकल्प करे ।

" संकल्पः--ॐ तत्सदद्य मासोत्तमे मासे अमुकमासे अमुकपक्षे अमुकवासरे अमुकतिथौ अमुकगोत्रोत्पन्नस्य ममात्मनः (वा अमुकयजमानस्य श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीविष्णुदेवस्य परमप्रसन्नतार्थं यथाज्ञानेन यथामिलितोपचारद्रव्यैः पुरुषसूक्तेन श्रीमहाविष्णोर्ध्यानावाहनादिषोडशोपचारैः पूजनमहं करिष्ये तत्रादौ (अंगन्यासपूर्वकं) कलशादिपूजनं च करिष्ये ॥ १ ॥

हाथमें गंधपुष्प सहित जल लेकर ॐ तत्सदद्य० इत्यादिका उच्चारण करके संकल्प करे । इतना ध्यान अवश्य रक्खे कि, जिस दिन जो तिथि वार हो उसीका उच्चारण करे, तथा आप स्वयं करे तो अपना और दूसरेकी ओरसे करे तो उसका नाम उच्चारण करे । यदि विष्णुके सिवाय अन्य देवका पूजन करना हो तो जहां 'महाविष्णोः' लिखा है वहां गणेश-रमेश-महेश-दिनेश आदि जिस देवताका पूजन करना हो उसी

देवताका नाम उच्चारण करके संकल्प करे । और फिर कलशादिकोंक पूजन करे ।

कलशपूजनम् । तत्रादौ कलशाऽऽवाहनम्सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयांतु देवपूजार्थं दुरितक्षयकारकाः॥ कलशस्य मुखे विष्णुः कण्ठे रुद्र समाश्रितः। मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः ॥ ततो वरुणावाहनम्–" ॐ तत्त्वायामि ब्रह्मणाव्वन्दमानस्तदाशास्ते यजमानोहविर्भिः । अहेडमानोव्वरुणेहबोध्युरुशꣳसमानऽआयुःप्प्रमोषीः ॥ ४ ॥ अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि । ततः कलशप्रार्थना–देवदानवसंवादे मथ्यमाने महोदधौ उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥ त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव । सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ ॐ कलशस्थवरुणाय नमः आवाहयामि। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

" सर्वे समुद्राः सरितः" इन मन्त्रोंसे कलशका आवाहन करे और उसमें "तत्त्वायामि" इस मंत्रसे वरुणका आवाहन करके " देवदानव-

संवादे" इत्यादिसे कलशकी प्रार्थना करे और फिर गन्धाक्षतपुष्पोंसे कलशका पूजन करे।

अनन्तरं कलशोदकेन पूजाद्रव्याणि तथाऽऽत्मानं च "अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा॥ यः स्मरे-त्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥ ॐ आपोहिष्ठाम-योभुवस्तानऽऊर्जे दधातन॥ महेरणाय चक्षसे॥५॥ योवः शिवतमो रसस्तस्य भाजयतेहनः। उशतीरिवमातरः॥६॥ तस्माऽअरंगमामवो यस्यक्षयायजिन्वथ। आपो-जनयथाच नः। इत्यादिमन्त्रैः सम्प्रोक्ष्य शंखं च जलेन प्रपूर्य पश्चात् कलशमुद्रां प्रदर्शयेत्।

पीछे कलशके जलसे पूजन सामग्रीको तथा अपने शरीरको अपवित्रः० आपोहिष्ठा०' इन मंत्रोंसे छींटा दे और शंखको जलसे भर देवे। पीछे कलशमुद्रा दिखावे।

शंखपूजनम्–शंखादौ चंद्रदैवत्यं कुक्षौ वरुणदेवता। पृष्ठे प्रजापतिश्चैव अग्रे गङ्गा सरस्वती॥ त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया। शंखे तिष्ठन्ति विप्रेन्द्र तस्माच्छंखं प्रपूजयेत्॥ त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे निर्मितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते॥ "पाञ्चजन्याय विद्महे पावमानाय धीमहि। तन्नः शंखः प्रचोदयात्।"

१–कलशमुद्रा–"दक्षांगुष्ठं परांगुष्ठे क्षिप्त्वा हस्तद्वयेन च। सावकाशां मुष्टिकां च कुर्यात्सा कुम्भमुद्रिका॥ १॥"

"ॐ अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥ ८ ॥" ॐ शंखस्थदेवतायै नमः आवाहयामि । सर्वोपचारार्थे गन्धपुष्पाणि समर्पयामि । नमस्करोमि । शंखमुद्रां प्रदर्शयेत् ।

"शंखादौ चन्द्रदै०" इन श्लोकोंसे प्रार्थना करके "ॐ अग्निर्ऋषिः०" इस मन्त्रसे गन्धपुष्प लेकर शंखका पूजन करे और शंखमुद्रा दिखावे ।

घण्टापूजनम्–"आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् । घण्टानादं प्रकुर्वीत पश्चाद् घण्टां प्रपूजयेत् ॥" "ॐ सुपर्णोसिगरुत्माँस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथंतरे पक्षौ ॥ स्तोमऽआत्माच्छन्दाꣳस्यंगानि यजूꣳषि नाम ॥ साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छंधिष्ण्याः शफाः ॥ सुपर्णोसि गरुत्मान्दिवं गच्छस्वः पत ॥ ९ ॥" ॐ गरुडाय नमः आवाहयामि सर्वोपचारार्थे गंधपुष्पाणि समर्पयामि, नमस्करोमि । घण्टामुद्रां प्रदर्शयेत् ।

"आगमार्थं तु०" इससे घंटाकी प्रार्थना करके "सुपर्णोसि गरु०" इस मन्त्रसे गन्ध पुष्प लेकर घंटास्थ गरुडका पूजन करे और घंटामुद्रा दिखावे ।

गणपत्यादिपञ्चायतनदेवतानां पूजनम्–तत्रादौ गणानां त्वेति गणेशपूजनम् "ॐ गणानांत्वागणपतिꣳ हवामहे

---

१ "वामांगुष्ठं तु संगृह्य दक्षिणेन तु मुष्टिना । कृत्वोत्तानं ततो मुष्टिमंगुष्ठं तु प्रसारयेत् ॥१॥ वामांगुल्यस्तथा श्लिष्टाः संयुक्ताः सुप्रसारिताः दक्षिणांगुष्ठसंस्पृष्टा ज्ञेयैषा शंखमुद्रिका ॥२॥ २ घण्टामुद्रा–मिथस्तर्जनिके श्लिष्टे श्लिष्टावंगुष्ठकौ तथा । मध्यमानामिके क्षौ तु पक्षाविव विचालयेत् ॥ १ ॥

प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनांत्वां निधिपतिꣳ हवामहेव्वसोमम । आहमजानिगर्ब्भधमात्वमजासि गर्ब्भधम् ॥ १० ॥ " गणपतयेनमः आवाहनादिपूजनम् । " ॐ अम्बेऽअम्बिकेऽ अम्बालिके नमानयतिकश्चन । ससस्त्यश्वकः सुभद्रिकांकाम्पीलवासिनीम् ॥११॥" देव्यै नमः आवाहनादिपूजनम् । " ॐ इदं विष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳ सुरे स्वाहा ॥ ॥ १२ ॥ " महाविष्णवे नमः आवाहनादिपूजनम् । " ॐ नमः शम्भवायचमयोभवायचनमः शंकरायचमयस्करायचनमः शिवायचशिवतरायच ॥ १३ ॥ " शिवायनमः आवाहनादिपूजनम् । " ॐ आ कृष्णेन रजसावर्तमानो निवेशयन्नमृतंमर्त्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानिपश्यन् ॥ १४ ॥ " सूर्याय नमः आवाहनादिपूजनम् । तदनन्तरं शालिग्रामपूजनम् ॥

गणेशजीको आदि लेकर अन्य जो मूर्तियां हों उनका यथोक्त मंत्रोंसे पूजन करे । यथा–गणानां त्वा० इस मंत्रसे गणेशजीका, अम्बेऽअंबिके० इससे देवीका, इदं विष्णु० इससे विष्णुका, नमः शम्भवाय० इससे शिवजीका और आकृष्णेन० इससे सूर्यका पूजन करे, और इनके पीछे शालिग्रामजीका पूजन करे ।

तत्रादौ षोडशांगन्यासप्रयोगः--अद्य पूर्वोच्चरितशुभ-

पुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं विष्णुपूजनार्थे षोडशांगन्यासांश्च करिष्ये ॥

तहां विष्णुपूजन करनेसे पहले षोडशांगन्यासार्थ अद्य० यह उच्चारण करके संकल्प और पीछे अंग न्यास करे।

"ॐ सहस्रशीर्षा०" इति वामकरे। (इस मंत्रसे बांये हाथको स्पर्श करे) "ॐ पुरुषऽए०" इति दक्षिणकरे (इससे दहिने हाथको) "एतावान०" इति वामपादे (इससे बांये पांवको) "त्रिपादूर्ध्व०" इति दक्षिण-पादे (इससे दहिने पांवको) "ॐ ततो विराड०" इति वामजानुनि (इससे बांई जंघाको) "ॐ तस्माद्यज्ञा०" इति दक्षिणजानुनि (इससे दहिनी जंघाको)"ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः०"इति वामकट्याम् (इससे बांई कटिको) "ॐ तस्मादश्वा०" इति दक्षिणक-ट्याम् (इससे दहिनी कटिको) "ॐ तं यज्ञं" इति नाभौ (इससे नाभिको) "ॐ यत्पुरुषं०" इति हृदये (इससे हृदयको) "ॐ ब्राह्मणोस्य०" इति वामकुक्षौ (इससे बांई कूखको) "ॐ चन्द्रमा मनसो०" इति दक्षिणकुक्षौ (इससे दहिनी कूखको) "ॐ नाभ्याऽआ०" इति कण्ठे (इससे कण्ठको) "ॐ यत्पुरुषं०" इति वक्त्रे (इससे मुखको) "ॐ सप्ता-स्यासन प०" इति अक्ष्णोः (इससे नेत्रोंको) और "ॐ यज्ञेन यज्ञ०" इति मूर्द्ध्नि (इससे मस्तकको) स्पर्श करे। ततः पूजां समारभेत। (अंगन्यास किये पीछे पूजा आरंभ करे)॥

१ आगे पूजनविधिमें ये मन्त्र समूचे लिखे हैं सो वहांसे देख लेना।

विष्णोरुत्थापनम्–" भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाᳬसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ " इति मन्त्रेण घण्टानादं कुर्यात् । " उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज । उत्तिष्ठ कमलाकान्त त्रैलोक्ये मङ्गलं कुरु ॥ " इति तालत्रयं दत्त्वा विष्णुमुत्थाप्य ताम्रपात्रे तुलसीदलोपरि सचक्रशालिग्रामं संस्थाप्य [दन्तधावनगण्डूषानन्तरं देहन्यासवत् देवन्यासं कुर्यात्]

"भद्रंकर्णे०" इस मंत्रसे घंटा बजाकर तीन ताली देवे और ये ार्थना करे कि हे गोविंद ! उठिये, उठिये, हे गरुडध्वज ! उठियें, कमलापते ! उठिये और त्रैलोक्यमें मंगल कीजिये। ऐसा कहकर भगवान्के ऊपरसे वस्त्र उतार देवे. और तांबेके पात्रमें तुलसीके पत्तों पर चक्रसहित शालिग्रामजीकी मूर्तिको अच्छी तरह स्थापित करके (दतौन और कुल्लोंके निमित्त जलकी दो चमची छोड देवे और तुलसीदलसे मूर्तिको स्पर्श करके नेत्र मूँदकर देहन्यासकी तरह देवन्यासका ध्यान करे) और फिर पूजन करे यथा—

आवाहनम्–' आगच्छ भगवन्देव स्थाने चात्र स्थिरो भव । यावत्पूजां करिष्यामि तावत्त्वं सन्निधौ भव ॥ '

---

१ ' द्वे चक्रे द्वारकायाश्च शालिग्रामशिलाद्वयम् । तेषां तु पूजनेनैव उद्वेगं प्राप्नुयाद् गृही ॥ १ ॥ दो चक्र और दो शालिग्राम पूजनेसे गृहस्थको उद्वेग प्राप्त होता है । "शिलाप्यामलकीतुल्या पूज्या सूक्ष्मैव या भवेत् । यथा यथा शिला सूक्ष्मा तथा स्यात्तु महाफलम् २" आँवलेकी तुल्य और अत्यन्त छोटे शालिग्राम जीको पूजना चाहिये जितनी छोटी मूर्ति होगी उतना ही अधिक फल मिलेगा ।

" ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । सभूमिंठं सर्व्वतस्पृत्वात्यतिष्ठद्दशांगुलम् ॥ १ ॥ " महाविष्णवे नमः आवाहनं समर्पयामि । (इससे आवाहन करे) आसनम्— 'रम्यं सुशोभनं दिव्यं सर्व सौख्यकरं शुभम् । आसनं च मया दत्तं गृहाण परमेश्वर ॥ ' " ॐ पुरुषऽएवेदठं सर्व्वं यद्भूतं रयच्चभाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥ " महाविष्णवे नमः आसनं समर्पयामि । (इससे आसन प्रदान करे) पाद्यम्— ' उष्णोदकं निर्मलं च सर्व सौगन्ध्यसंयुतम् । पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ॥ ' " ॐ एतावानस्य महिमाऽतो ज्यायाँश्च पूरुषः । पादोस्य विश्वाभूतानि त्रिपादस्यामृतन्दिवि ॥ ३ ॥ महाविष्णवे नमः पाद्यं समर्पयामि । (इससे पाद्यार्थ एक चमची जल छोड देवे) अर्घ्यम्— ' अर्घ्यं गृहाण देवेश गन्धपुष्पाक्षतैः सह । करुणाकर मे देव गृहाणार्घ्यं नमोऽस्तु ते ॥' ॐ त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः । ततोविष्ष्वङ् व्यक्रामत्साशनानशनेऽअभि ॥ ४ ॥ " महाविष्णवे नमः अर्घ्यं समर्पयामि । (इससे अर्घ्य प्रदान करे) आचमनम्-' सर्वतीर्थसमायुक्तं सुगन्धि निर्मलं जलम् । आचम्यतां मया दत्तं गृह्यतां परमेश्वर ॥ ' " ॐ ततो विराडजायत विराजोऽअधिपूरुषः ॥

सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ ५ ॥ ” महाविष्णवे नमः आचमनीयं समर्पयामि (इससे आचमन देवे) स्नानम्-‘ गङ्गासरस्वतीरेवापयोष्णीनर्मदाजलैः ॥ स्नापितोऽसि मया देव तथा शांतिं कुरुष्व मे ॥ ’ “ ॐ तस्माद्यज्ञात्सर्व्वहुतः सम्भृतंपृषदाज्यम् । पशूँस्ताँश्चक्रेव्वायव्यानारण्याग्ग्राम्याश्चये ॥ ६ ॥ ” महाविष्णवे नमः स्नानं समर्पयामि । [अत्रावसरे शंखपूरितोदकेन “ ॐ इदंविष्णुर्विचक्रमे० ॥ ” इति मन्त्रेण शालिग्रामं स्नापयेत्] (इससे स्नान कराते समय बांये हाथसे घण्टा बजावें, और दहिने हाथसे जलसे शंख भरके स्नान करावे) [इस अवसरमें “इदंवि०” इस मंत्रसे शालिग्रामजीको स्नान करावे]

[यह ध्यान रखना चाहिये कि यदि नित्य न बने तो व्रतोत्सव पर्वदिन महापूजा आदिमें–

“ पञ्चनद्यः सरस्वतीमपियन्तिसस्रोतसः । सरस्वतीतु पञ्चधा सो देशेऽभवत्सरित् ॥ ”

इस मंत्रसे पंचामृतसे स्नान करावे, इसके पीछे एक तुलसीपत्रसे गंध लेकर उद्वर्तन (उबटना) कर देवे । [शालिग्रामजीके सिवाय धातु या

---

१ गौका दूध, दही, घी, शहद और शक्कर इनको मिलानेसे पञ्चामृत होता है । पञ्चामृतसे स्नान करावे जब “पञ्चनद्यः०” इस मन्त्रसे करावे । और पहले दूध, दही, घी, सहत, खांड इनसे पृथक् २ करावे तो, क्रमसे–‘ पयः पृथिव्यां० दधिक्राव्णो० घृतंघृत० मधुव्वाता० अपाᳪरस०’’ इन मन्त्रोंसे करावे ।

पाषाणकी जो छः अंगुलसे बडी देवमूर्ति हों उनको नित्य स्नान नहीं कराना चाहिये]

वस्त्रम्--' सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे । मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥ ' " तस्माद्यज्ञात्सर्व्वहुतऽऋचः सामानिजज्ञिरे । छन्दाᳬंसिजज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥ " महाविष्णवे नमः वस्त्रं समर्पयामि । (इससे वस्त्र समर्पण करे) यज्ञोपवीतम्-- । 'नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् । उपवीतं चोत्तरीयं गृहाण परमेश्वर ॥ ' " तस्मादश्वाऽअजायन्तयेकेचोभयादतः । गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥ ८ ॥ " महाविष्णवे नमः यज्ञोपवीतं समर्पयामि । (इससे यज्ञोपवीत धारण करावे) गन्धम्--' श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥ ' " तंयज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्रतः ॥ तेन देवाऽअयजन्तसाध्याऽऋषयश्चये ॥ ९ ॥ " महाविष्णवे नमः गन्धं समर्पयामि । (इससे गन्ध चढावे) पुष्पाणि--' माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो । मयाऽऽनीतानि पुष्पाणि गृहाण परमेश्वर ॥ ' " यत्पुरुषं व्यदधुःकतिधाव्व्यकल्पयन् । मुखंकिमस्यासीत्किम्बाहू किमूरू पादाऽउच्येते ॥ ॥ १० ॥ " महाविष्णवे नमः पुष्पाणि समर्पयामि (इससे

पुष्प चढावे)। याद रखना चाहिये कि, विष्णुको पुष्प, गणेशको दूर्वा और शिवको बिल्वपत्र चढावे। तुलसीदलम्--' तुलसीं हेमरूपां च रत्नरूपां च मञ्जरीम् । भवमोक्षप्रदां तुभ्यमर्पयामि हरिप्रियाम् । ' " विष्णोः कर्म्माणि पश्यत यतोव्रतानि पस्पशे । इन्द्रस्य युज्यः सखा । " महाविष्णवे नमः तुलसीदलं समर्पयामि । (इससे तुलसी चढावे)। धूपम्-'वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ' " ब्राह्मणोस्यमुखमासीद्बाहूराजन्य÷कृतः। ऊरूतदस्य यद्वैश्यःपद्भ्याᳪशूद्रोऽअजायत ॥ ११ ॥" महाविष्णवे नमः धूपमाघ्रापयामि । (इससे धूप देवे) दीपम्--' साज्यञ्च वर्तिसंयुक्तं वह्निना योजितं मया। दीपं गृहाण देवेश त्रैलोक्यतिमिरापह ॥' " चन्द्रमामनसो जातश्चक्षोः सूर्य्योऽअजायत । श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत ॥ १२ ॥" महाविष्णवे नमः दीपं दर्शयामि । (इससे दीपक दिखावे) नैवेद्यम्--'शर्कराघृतसंयुक्तं मधुरं स्वादु चोत्तमम् । उपहारसमायुक्तं मधुरं स्वादु चोत्तमम् । उपहारसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥"

---

१ तुलसीदल उतारनेका मन्त्र -' तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया । केशवार्थे चिनोसि त्वां वरदा भव शोभने ॥ १ ॥ त्वदङ्गसम्भवैः पत्रैः पूजयामि यथा हरिम् । तथा कुरु पवित्रांगि कलौ मलविनाशिनि ॥ २ ॥

" नाभ्याऽआसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत। पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ऽअकल्पयन् ॥१३॥ "
[इति मन्त्रेण तुलसीदलेन सम्प्रोक्ष्य नैवेद्योपरि तुलसीः निधाय धेनुमुद्रां प्रदर्श्य सव्यहस्तस्यांगुलीः समानाः कृत्वा नैवेद्यं समर्पयेत् । यथा--" ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ उदानाय स्वाहा, ॐ समानाय स्वाहा ।" इति समर्प्य मध्ये पानीयं दत्त्वा--आचमनीयं च समर्पयामि]
इससे नैवेद्य अर्पण करे ॥

यथा--(नैवेद्यके पदार्थको भगवान्के सामने रखकर तुलसीदलसे प्रोक्षण करके तुलसीपत्र नैवेद्यपर रख देवे और धेनुमुद्रा दिखाकर दहिने हाथकी अंगुलियोंको समान करके " ॐ प्राणाय स्वाहा" इत्यादिसे नैवेद्य अर्पण करे । और पीछे मध्यमें जलपान कराके आचमन करावे)
तांबूलम्--' पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् । एलाचूर्णादिसंयुक्तं तांबूलं प्रतिगृह्यताम् । ' " यत्पुरुषेणहविषा देवायज्ञमतन्वत । वसन्तोस्यासीदाज्यंग्रीष्मऽइध्मः शरद्धविः ॥ १४ ॥ ' महाविष्णवे नमः ताम्बूलं समर्पयामि

---

१ धेनुमुद्रा--"दक्षानामासमायुक्ता वामहस्तकनिष्ठिका । वामानामासमायुक्ता दक्षपाणिकनिष्ठिका ॥ १ ॥ दक्षस्य मध्यमाक्रांता वामहस्तस्य तर्जनी । वाममध्यमयाक्रान्ता दक्षहस्तस्य तर्जनी ॥२॥ संयुक्तौ कारयेद्विद्वानंगुष्ठावुभयोरपि । धेनुमुद्रा निगदिता गोपिता साधकोत्तमैः ॥ ३ ॥

(इससे ताम्बूल समर्पण करे) दक्षिणा--' हिरण्यगर्भगर्भस्थ हेम बीजं विभावसोः । अनन्तपुण्यफलदमतः शांतिं प्रयच्छ मे ॥ " " हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ॥ सदाधार पृथिवीन्द्यामुतेमाङ्कस्मैदेवाय हविषाविधेम ॥ १५ ॥" महाविष्णवे नमः दक्षिणां समर्पयामि । (इससे दक्षिणा समर्पण करे । और छत्र, चामर, पादुका, दर्पण आदि राजोपचारका ध्यान करे) आरार्तिक्यम्--' कदलीगर्भसम्भूतं कर्पूरं च प्रदीपितम् ॥ आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥' " ॐ इदर्ठ० हविः प्प्रजननम्मेऽअस्तु दशवीरर्ठ० सर्व्वगणᳯ स्वस्तये । आत्मसनि प्प्रजासनि पशुसनि लोकसन्न्यभयसनि॥अग्निः प्प्रजाबहुलाम्मेकरोत्वन्नम्पयोरेतोऽअस्मासुधत्त ॥१६॥"इति मन्त्रेण कर्पूरं घृतवर्तिकां वा प्रज्वाल्य " ॐ श्रीश्चतेलक्ष्मीश्च पत्न्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण॥"इति मन्त्रेण तुलसीपुष्पयुक्तजलेन आरार्तिकोपरि मण्डलं कुर्यात् । स्थितः सन् वामकरेण घण्टानादं कृत्वा दक्षिणकरेण आरार्तिकां शंखमपि भ्रामयेत् ॥

१ आरार्तिकाभ्रामणस्य प्रकारः-"आदौ चतुष्पादतलैकदेशे द्विर्नाभिदेशे मुखमण्डलैकम् । सर्वेषु देशेषु च [सप्तवारमारार्तिकां भक्तजन प्रकुर्यात् ॥ १ ॥ शंखमध्ये स्थितं तोयं भ्रामितं केशवोपरि । अङ्गलग्नं मनुष्याणां ब्रह्महत्यां व्यपोहति ॥ २ ॥"

"कदलीगर्भ० इदर्ठ हवि०" इन मंत्रोंसे कपूर किंवा घृतबत्तियोंको जलाकर "श्रीश्चते" इस मंत्रसे हाथमें तुलसी-पुष्पयुक्त जल लेकर उसके चौतर्फ मंडल कर देवे । फिर खडा होके बांये हाथसे घण्टा बजावे और दहिने हाथसे धीरे धीरे आरती उतारे और शंखका भी भ्रामण करे ।

अत्रावसरे " शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् । लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्व-लोकैकनाथम् ॥ १ ॥ नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्र पादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते सहस्र कोटीयुगधारिणे नमः ॥ २ ॥ नमः कमलनाभाय नमस्ते जलशायिने । नमस्ते केशवानन्त वासुदेव नमोऽस्तु ते ॥ ३ ॥ वासनाद्वासुदेवस्य वासितं भुनवत्रयम् । सर्वभूत-निवासोऽसि वासुदेव नमोस्तु ते ॥ ४ ॥ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ ५ ॥ " इत्यादिश्लोकान्पठित्वा नानाविध-वादित्रा-दीनि वादयेत्) महाविष्णवे नमः आरार्तिकां समर्पयामि ।

आरती उतारनेके समय "शांताकारं० नमोस्त्वनंताय०" आदि श्लोकोंको पढे और शंख, भेरी, मृदंग, घंट़ा, घडावल, नक्कारे आदिको

बजावे । पीछे शंखोदकका छींटा और आरतीका आतप देवे । इस प्रकार आरार्तिका करे ।

प्रदक्षिणा—' यानि कानि च पापानि जन्मान्तरकृतानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणपदेपदे ॥ ' सुप्तास्या सन्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञन्तन्वाना ऽअबध्नन्पुरुषम्पशुम् ॥ १७ ॥ " महाविष्णवे नमः प्रदक्षिणां समर्पयामि ।

इससे प्रदक्षिणा (परिक्रमा) करे । ध्यान रहे कि एक परिक्रमा गणेशके, दो सूर्यके तीन शिवके चार भगवान्के और सात अश्वत्थके करना चाहिये ।

पुष्पाञ्जलिः—' नानासुगन्धपुष्पाणि यथाकालोद्भवानि च । पुष्पांजलिं मया दत्तं गृहाण परमेश्वर ॥ ' " यज्ञेन यज्ञम-यजन्तदेवास्तानि धर्माणिप्प्रथमान्यासन् ॥ तेहनाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥१८॥ " महाविष्णवे नमः । मन्त्रपुष्पाञ्जलिं नमस्कारं समर्पयामि । इससे मन्त्रपुष्पाञ्जलि देवे और नमस्कार करे) क्षमाप्रार्थना— "कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्याऽऽत्मना वा प्रकृति-स्वभावात् । करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पये तत् ॥ "

(इससे क्षमाप्रार्थना करे, अर्थात् हाथ जोडकर कहे कि, मैंने काया वाक्य, मन, इंद्रियां, बुद्धि वा प्रकृतिके स्वभावसे जो कुछ किया है वह नारायणके अर्थ समर्पण है)।

देवतीर्थ (चरणामृत) ग्रहणम्–प्रह्लादनारदपराशरपुण्डरीकव्यासाम्बरीषशुकशौनकभीष्मकाद्याः । रुक्मांगदार्जुनवशिष्ठविभीषणाद्या । एतानहं परमभागवतान्नमामि ॥ १ ॥ हनुमद्-गरुड-नारद-सनक-सनन्दन-सनातन-सनत्कुमार-जय-विजय-शील-सुशीलादि-समस्तभगवद्भक्तानां देवतीर्थार्पणं कृत्वा पश्चात् "विष्णुपादाभिषिक्तं यः पात्रेणैव पिबेज्जलम् । सर्वपापविनिर्मुक्तः स याति परमां गतिम् ॥ १ ॥ अकालमृत्युहरणं सर्वव्याधिविनाशनम् । विष्णुपादोदकं पीत्वा पुनर्जन्म न विद्यते ॥ २ ॥" इति पात्रान्तरेण स्वयमेव सर्वं पिबेत् ।

(इससे चरणामृत ग्रहण करे यथा–प्रथममें चमची भरके "प्रह्लाद नारदादि०" भगवद्भक्तोंको देनेका ध्यान करे और पीछे 'विष्णुपादाभिषि० अकालमृ०' इन मन्त्रोंसे पात्रांतरसे आप पीवे ।)

"प्रथमं कायशुद्ध्यर्थं द्वितीयं धर्मसाधनम् ।
तृतीयं मोक्षदं प्रोक्तं त्रिधा तीर्थजलं पिबेत् ॥ १ ॥"

लोग चरणामृतकी जो तीन चमची लेकर पीते हैं उसका यह कारण है कि, पहला शरीर शुद्धिके वास्ते, दूसरा धर्मसाधनके वास्ते और तीसरा

---

१ चरणामृत–'शिला ताम्र तथा तोयं शंखं पुरुषसूक्तकम् । गंधो घण्टा च तुलसी ह्यष्टांगं चरणामृतम् ॥ १ ॥

मोक्ष देनेवाला कहा है। इसलिये तीन दफे तीर्थ (चरणामृत) पीना चाहिये। इति विष्णुपूजाप्रयोगः ॥

पञ्चायतनआर्ती[1]--" करुणापारावारं कलिमलपरिहारं कद्रूसुतशयितारं करधृतकह्लारम् घनपटलाभशरीरं कमलोद्भवपितरं कलये विष्णुमुदारं कमलाभर्त्तारम् ॥ १ ॥ जय देव जय देव जय केशव हर गजमुख सवितर्नगतनयेऽहं चरणौ तव कलये ॥ जय देव जय देव० ॥ भूधरजारतिलीलं मंगलकरशीलं भुजगेशस्मृतिलोलं भुजगावलिमालम्। भूषाऽऽकृतिमतिविमलं संधृतगांगजलं भूयो नौमि कृपालं भूतेश्वरमतुलम् ॥ जय देव० ॥ २ ॥ विघ्नारण्यहुताशं विहितानयनाशं विपदवनीधरकुलिशं विधृतांकुशपाशम्। विजयार्कज्वलिताशं विदलितभवपाशं विनताः स्मो वयमनिशं विद्याविभवेशम्। जय देव० ॥ ३ ॥ कश्यपसूनुमुदारं कालिन्दीपितरं कालत्रितयविहारं कामुकमन्दारम्। कारुण्याब्धिमपारं कालानलमुदरं कारणतत्त्वविचारं कामय ऊष्मकरम। जय देव० ॥ ४ ॥ निगमैर्नुतपद्कमले निहतासुरजाले हस्ते धृतकरवाले निर्जरजनपाले। नितरां कृष्णकृपाले निरवधिगुणलीले निर्जरनुतपदकमले नित्योत्सवशीले ॥ जय देव० ॥ ५ ॥ इति विष्णु-

---

१ बहुधा लोग–शिव, दुर्गा आदिकी भाषा आरती संस्कृतमें गाया करते हैं अत हमने संस्कृतज्ञ लोगोंके लिये वैसी ही आरती यहां संयुक्त की है।

महेश -गणेश--भास्कर--कृष्णारार्तिकाःसमाप्ताः। सुशान्तिर्भवतु। वृद्धिशतानि भवन्तु। अर्पणम् । " अनेन षोडशोपचारपूजनारार्तिकेन श्रीमहाविष्णुः प्रीयतां न मम "

ॐतत्सद्ब्रह्मार्पणमस्तु ।

इति श्रीमल्लक्ष्मीनारायणात्मज हनूमान्शर्मसंगृहीत भाषाटीकालंकृतविष्णुपूजनविधिः समाप्तः ।

पुस्तकें मिलने के स्थान

१) खेमराज श्रीकृष्णदास,
श्रीवेंकटेश्वर स्टीम प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
खेतवाडी, मुंबई - ४०० ००४.

२) खेमराज श्रीकृष्णदास,
६६, हडपसर इण्डस्ट्रिअल इस्टेट
पुणे - ४११ ०१३.

३) गंगाविष्णु श्रीकृष्णदास
लक्ष्मीवेंकटेश्वर स्टीम प्रेस,
व बुक डिपो,
अहिल्याबाई चौक, कल्याण
(जि. ठाणे - महाराष्ट्र)

४) खेमराज श्रीकृष्णदास,
चौक - वाराणसी (उ.प्र.)

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर,
मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,
पुणे - ४११ ०१३.
दूरभाष-०२०-६८७१०२५,

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डींग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१.
दूरभाष - ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-४२००७८.

KHEMRAJ SHRIKRISHNADASS